# श्री लक्ष्म्यष्टोत्तर शतनाम स्तोत्रम्

देव्युवाच
देवदेव महादेव त्रिकालज्ञ महेश्वर ।
करुणाकर देवेश भक्तानुग्रह कारक ॥ १॥
अष्टोत्तरशतं लक्ष्म्याः श्रोतुमिच्छामि तत्त्वतः ।

ईश्वर उवाच
देवि साधु महाभागे महाभाग्य प्रदायकम् ।
सर्वैश्वर्यकरं पुण्यं सर्वपाप प्रणाशनम् ॥ २॥

सर्वदारिद्य शमनं श्रवणाद्भुक्ति मुक्तिदम् ।
राजवश्यकरं दिव्यं गुह्याद्गुह्यतमं परम् ॥ ३॥

दुर्लभं सर्वदेवानां चतुःषष्टि कलास्पदम् ।
पद्मादीनां वरान्तानां विधीनां नित्यदायकम् ॥ ४॥

समस्तदेव संसेव्यं अणिमाद्यष्ट सिद्धिदम् ।
किमत्र बहुनोक्तेन देवी प्रत्यक्ष दायकम् ॥ ५॥

तव प्रीत्याद्य वक्ष्यामि समाहितमनाः शृणुं ।
अष्टोत्तर शतस्यास्य महालक्ष्मीस्तु देवता ॥ ६॥

क्लींबीज पदमित्युक्तं शक्तिस्तु भुवनेश्वरी ।
अङ्गन्यासः करन्यास स इत्यादिः प्रकीर्तितः ॥ ७॥

ध्यानम्
वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
हस्ताभ्यां अभयप्रदां मणिगणैर्नाना विधैर्भूषिताम् ।
भक्ताभीष्ट फलप्रदां हरिहर ब्रह्मादिभिः सेवितां
पार्श्वे पङ्कज शङ्ख पद्म निधिभिर्युक्तां सदा शक्तिभिः ॥ ८॥

सरसिज नयने सरोजहस्ते धवलतरांशुक गन्धमाल्य शोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीद मह्यम् ॥ ९॥

प्रकृतिं विकृतिं विद्यां सर्वभूत हित प्रदाम् ।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकाम् ॥ १०॥

वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधाम् ।
धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीम् ॥ ११॥

अदितिं च दितिं दीप्तां वसुधां वसुधारिणीम् ।
नमामि कमलां कान्तां कामां क्षीरोद सम्भवाम् ॥ १२॥

अनुग्रहपदां बुद्धिं अनघां हरिवल्लभाम् ।
अशोका ममृतां दीप्तां लोकशोक विनाशिनीम् ॥ १३॥

नमामि धर्मनिलयां करुणां लोकमातरम् ।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुन्दरीम् ॥ १४॥

पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमाम् ।

पद्ममालाधरां देवीं पद्मिनीं पद्मगन्धिनीम् ॥ १५॥

पुण्यगन्धां सुप्रसन्नां प्रसादाभिमुखीं प्रभाम् ।
नमामि चन्द्रवदनां चन्द्रां चन्द्र सहोदरीम् ॥ १६॥

चतुर्भुजां चन्द्ररूपां इन्दिरा मिन्दु शीतलाम् ।
आह्लाद जननीं पुष्टिं शिवां शिवकरीं सतीम् ॥ १७॥

विमलां विश्व जननीं तुष्टिं दारिद्य नाशिनीम् ।
प्रीति पुष्करिणीं शान्तां शुक्लमाल्याम्बरां श्रियम् ॥ १८॥

भास्करीं बिल्व निलयां वरारोहां यशस्विनीम् ।
वसुन्धरा मुदाराङ्गीं हरिणीं हेममालिनीम् ॥ १९॥

धनधान्यकरीं सिद्धिं सदा सौम्यां शुभप्रदाम् ।
नृपवेश्म गतानन्दां वरलक्ष्मीं वसुप्रदाम् ॥ २०॥

शुभां हिरण्य प्राकारां समुद्र तनयां जयाम् ।
नमामि मङ्गलां देवीं विष्णु वक्षःस्थल स्थिताम् ॥ २१॥

विष्णुपत्नीं प्रसन्नाक्षीं नारायण समाश्रिताम् ।
दारिद्य ध्वंसिनीं देवीं सर्वोपद्र वहारिणीम् ॥ २२॥

नवदुर्गां महाकालीं ब्रह्मविष्णु शिवात्मिकाम् ।
त्रिकालज्ञान सम्पन्नां नमामि भुवनेश्वरीम् ॥ २३॥

लक्ष्मीं क्षीर समुद्रराज तनयां श्रीरङ्ग धामेश्वरीं
दासीभूत समस्त देव वनितां लोकैक दीपाङ्कुराम् ।
श्रीमन्मन्द कटाक्ष लब्ध विभव ब्रह्मेन्द्र गङ्गाधरां
त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥ २४॥

मातर्नमामि कमले कमलायताक्षि
श्रीविष्णु हृत्कमल वासिनि विश्वमातः ।
क्षीरोदजे कमल कोमल गर्भ गौरि
लक्ष्मि प्रसीद सततं नमतां शरण्ये ॥ २५॥

त्रिकालं यो जपेद्विद्वान् षण्मासं विजितेन्द्रियः ।
दारिद्य ध्वंसनं कृत्वा सर्वमाप्नो त्ययत्नतः ॥ २६॥

देवीनाम सहस्रेषु पुण्य मष्टोत्तरं शतम् ।
येन श्रिय मवाप्नोति कोटिजन्म दरिद्रतः ॥ २७॥

भृगुवारे शतं धीमान् पठेद्वत्सर मात्रकम् ।
अष्टैश्वर्य मवाप्नोति कुबेर इव भूतले ॥ २८॥

दारिद्य मोचनं नाम स्तोत्र मम्बा परं शतम् ।
येन श्रिय मवाप्नोति कोटिजन्म दरिद्रितः ॥ २९॥

भुक्त्वा तु विपुलान् भोगां अस्याः सायुज्य माप्नुयात् ।
प्रातःकाले पठेन्नित्यं सर्वदुःखोप शान्तये ।
पठंस्तु चिन्तयेद्देवीं सर्वाभरण भूषिताम् ॥ ३०॥

॥ इति श्रीलक्ष्म्यष्टोत्तर शतनाम स्तोत्रं सम्पूर्णम् ॥